श्रीगणेशायनमः शंकर उवाच देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवं
म्रियन्ते साधका येन विना श्मशानभूमिषु १ रणेषु चातिघोरेषु म
हावायुजलेषु च शृंगीसलिलवज्रेषु ज्वरादिव्याधिवह्निषु २ देव्यु
वाच कथयामि शृणु प्राज्ञ बटुकस्य कवचं शुभम् गोपनीयं प्रय
त्नेन मातृजारपरोपमा [illegible] अस्य बटुकभैरवकवचस्य आनन्दभै
रव ऋषिरनुष्टुप्छन्दः बटुकभैरवो देवता वं बीजं ह्रीं शक्तिः प्रणवं
कीलकं अभीष्टसिद्ध्यर्थे जपे विनियोगः सहस्रारे महापद्मे कर्पूर
धवलो गुरुः पातु मां बटुको देवो भैरवः सर्वकर्मसु ४ पूर्वस्याम
सितांगो मे दिशि रक्षतु सर्वदा आग्नेय्यां च रुरुः पातु दक्षिणे [illegible] रो

१

चण्डभैरवः ५ नैरृत्यां क्रोधनः पातु मामुन्मत्तश्च पश्चिमे ६ वायव्यां मे कपाली च नित्यं पायात्सुरेश्वरः ६ भीषणो भैरवः पायादुत्तरस्यां दिशि सदा संहारभैरवः पातु दिश्यैशान्यां महेश्वरः ७ ऊर्ध्वं पातु विधाता वै पाताले ऽनन्तकोविदः सद्योजातस्तु मां पायात्सर्वतो देवसेवितः ८ वामदेवश्च तु प्रान्ते वने घोरस्तथावतु जलेन तत्पुरुषः पातु दृश्यानो भुवि सर्वदा ९ डाकिनीपुत्रकः पातु दारांस्तु लाकिनीसुतः पातु साकिनिकः पुत्रः श्रियं मे सततं गिरो १० मालिनीपुत्रकः पातु पशून्श्वान गजांस्तथा महाकालो ऽवतु छत्रं सैन्यं वै कालभैरवः ११ चापं चापप्रियः पायाद्भैरवो भीतिहा भवः एतत्कवचमीशान